# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा – प्रथमपत्रिका

**दिनाङ्क:- ३०-१-२०२२** **पूर्वाह्ण: १०.०० त: १.०० पर्यन्तम्**

**समय:- होरात्रयम्** **अङ्का: - १००**

**<u>सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:</u>**

1. **अष्टानाम् एक वाक्येन उत्तरं लिखत।** **8**

१. शारदापीठं कैः प्रतिष्ठापितम् ?
२. नीलकण्ठदीक्षितः कस्य पौत्रः ?
३. पुष्पभूतिवंशजः कः राजा सूर्योपासकः आसीत् ?
४. शन्तनोः प्रथमा भार्या का ?
५. लक्ष्म्याः सहोदरः कः ?
६. किरातार्जुनीये कति सर्गाः सन्ति ?
७. "सोमदत्तं" कस्य राज्ञः रथम् आसीत् ?
८. उर्वश्या सह का अपि अपहृता ?
९. उत्तररामचरितस्य रचयिता कः ?
१०. गरुडस्य आहारार्थं कः प्रेषितः आसीत् ?

2. **षण्णां वाक्यद्वयेन उत्तरं लिखत।** **12**

१. सुयात्रा का ? सा राजानं किमूचे ?
२. शिलागजः कुत्र आसीत् ? सिद्धः तेन किम् अकारयत् ?
३. गाङ्गेयस्य गुरुः कः ? सः शिष्यं किमाज्ञापयत् ?
४. अप्सरसः कुतः चुक्रुशुः ?
५. लक्ष्मीः कान् कान् परिहरति ?
६. भवभूतेः कृतयः काः ? तस्य कवेः पिता कः ?
७. मदस्य अनर्थहेतुम् उपपादयत।
८. कानि दातुं श्रीगुरवः शारदां प्रार्थयन्ति ?

**3. त्रयाणां पञ्चषैः वाक्यैः उत्तरं लिखत ।** **9**

१. राज्ञा पृष्टः सिद्धः किम् उत्तरम् अदात् ?

२. मात्रा समाश्वस्तः गाङ्गेयः तां किमूचे ?

३. "उपकृतं खलु दानवैः" एवं का अचिन्तयत् ? कुतः ?

४. "कुमार तथा प्रयतेयाः" कथम् ?

५. नागराजेन गरुत्मान् किमभिहितः ?

**4. त्रयाणां ससन्दर्भं विवृणुत ।** **9**

१. "भुजे वीर्यं वसति, न वाचि"।

२. "इममिक्षुमसौ गिलतु"।

३. "वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः"।

४. "ते दिव्यं स्थानं न भविष्यति" ।

५. "स्वतःप्रकाशानि आवयोः अस्त्राणि"।

**5. एकस्य पद्यस्य सान्वयमर्थं लिखत ।** **4**

१. भसितं रसनासु निक्षिपन् कवयामास जडाननेकधा।
वितितार परां विरक्तितां विषयासङ्गमलीमसात्मनाम्॥

२. जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
परार्थं बद्धकक्षाणां त्वादृशामुद्भवः कुतः॥

**6. श्लोकद्वयं पूरयत ।** **6**

१. पापौघं ध्वंसयित्वा---------------- मह्यम् ॥

२. शान्त्याद्याः सम्पदो मे ----------- मह्यम् ॥

३. बलवानपि --------------------------सम्पदः ॥

**7. एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत ।** **4**

१. नीलकण्ठदीक्षितः २. लक्ष्मणसूरिः

**8. चतुर्णां रूपाणि परिचाययत ।** **4**

१. अध्यवसायः २. वेलायाम् ३. अर्पय

४. त्राता ५. उपलभ्य ६. वाचि

**9. चत्वारि पदानि संस्कृतवाक्येषु योजयत ।** **4**

१. आयोधनम् २. प्रदीयते ३. अमी

४. अन्तरायः ५. कुप्यन्ति ६. कविना

**10. चतुर्णां पर्यायपदं लिखत ।** **4**

१. ओघः २. रोधः ३. सुपर्वलोकः

४. कुम्भीलकः ५. पयोदः ६. सद्म

**11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत ।** **6**

१. सन्दर्भोऽस्माभिः २. वेलेयम् ३. किञ्चिच्छ्रोतुमिच्छामि

४. मन्त्रैरपि ५. अस्माद्गिरिशिखरात् ६. तथैव

**12. चतुर्णाम् एकपदं लिखत ।** **4**

१. चौर्येण अवाप्तं धनम् २. तरुणतृणविशेषः ३. कर्तुम् इच्छा

४. युद्धस्य विरामकालः ५. शतक्रतोः इयम् ६. अकुटिलयुद्धव्यापारः

**13. चतुर्णां व्याकरणविशेषं लिखत ।** **8**

१. रोषमयम् २. भवान् पठतु ३. सुदिनायते

४. देव्यै नमः ५. विजयस्व ६. पुष्पेभ्यः स्पृहयति

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** **8**

१. गन्धर्वराजः २. पञ्चपात्रम् ३. यथारुचि

४. शाकपार्थिवः ५. वृकोदरः ६. लतागुल्मवृक्षाः

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत।** **6**

१. अलभत    २. ददर्श    ३. पूरयामास

**16. चतुर्णां रिक्तस्थानानि पूरयत।** **4**

१. नायमवसरः मम -------------- द्रष्टुम्।

२. चित्रलेखे ! क्व नु मे --------।

३. न -------------- सममस्ति साधनम्।

४. कादम्बरीसंग्रहः ------------------- कविना समुपनिबद्धः।

५. सह शिष्यैः ------------------------------------ हरः॥

----------------